अथ प्रथमोऽध्यायः atha prathomodhyāyah ।

धृतराष्ट्र उवाच । dhritarāśtra uvāca ।

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय।।१.१

dharmakśetre kurukśetre samavetā yuyutsavah ।
māmakāh pāṇḍavāscaiva kimakurvata sanjaya ।। 1.1

सञ्जय उवाच । sanjaya uvāca ।

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्।।१.२

driśṭvā tu pāṇḍavānīkam vyūḍham duryodhanastadā ।
ācāryam upasamgamya rājā vacanam abravīt ।। 1.2

पश्यैतां पाण्डुपुत्राणां आचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ।। १.३

paṣyaitām pāṇḍuputrāṇām ācārya mahatīm camūm ।
vyūḍhām drupataputreṇa tava ṣiśyeṇa dhīmatā ।। 1.3

अत्र शूरा महेष्वासा भीमार्जुनसमा युधी।
युयुधानो विराटश्च द्रुपदश्च महारथः ।। १.४

atra ṣūrā maheśvāsā bhīmārjuna samā yudhi ।
yuyudhāno virāṭasca drupadasca mahārathah ।। 1.4

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ।। १.५

dhriśṭaketus-cekitānah kāṣirājaṣca vīryavān ।
purujit-kunti-bhojaṣca ṣaibyaṣca narapungavah ।।1.5

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ।। १.६

yudhāmanyuṣca vikrānta uttamaujāṣca vīryavān ।
saubhadro draupadeyāṣca sarva eva mahārathāh ।।1.6